# Tungabhadra Stutih

# तुङ्गभद्रास्तुतिः

## Document Information

Text title : Tungabhadra Stutih 2

File name : tungabhadrAstutiH2.itx

Category : devii, nadI, devI

Location : doc_devii

Description/comments : brahmANDapurANe tuNgabhadrAmAhAtmye

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# तुङ्गभद्रास्तुतिः

श्रीविभाण्डक उवाच ।
वराहदेहसम्भूते गिरिजे पापभञ्जिनि ।
दर्शनान्मुक्तिदे देवि महापातकिनामपि ॥ १॥

वाग्देवी त्वं महालक्ष्मीः गिरिजासि शची तथा ।
प्रभा सूर्यस्य देवेशि मरीचिस्त्वं कलानिधेः ॥ २॥

पर्जन्यस्य यथा विद्युद्विष्णोर्माया त्वमेव हि ।
तृणगुल्मलतावृक्षाः सिद्धा देवा उदीरिताः ॥ ३॥

दृष्टा स्पृष्टा तथा पीता वन्दिता चावगाहिता ।
मुक्तिदे पापिनां देवि शतकृत्वो नमो नमः ॥ ४॥

माण्डव्य उवाच ।
नमस्ते तुङ्गभद्रायै नमस्ते हरिदेहजे ।
नमस्ते वेदगिरिजे श्रीशैलपदभाजिनि ॥ १॥

विष्णुमाये विष्णुरूपे विष्वक्सेनप्रिये"नघे ।
विश्वम्भरे विशालाक्षि विलसत्कूलसंयुते ।
विलोकय विनोदेन कुरु मां विगतैनसम् ॥ २॥

त्वद्वातवीजिता भूता विमलाघा भवन्ति हि ।
दर्शनात् स्पर्शनात् पानाद्वक्तव्यं किं नु विद्यते ॥ ३॥

दृष्ट्वा जन्मशतं पापं स्पृष्ट्वा जन्मशतत्रयम् ।
पीत्वा जन्मसहस्राणां पापं नाशय मङ्गले ॥ ४॥

पुत्रान् दारान् धनं धान्यं पशुवस्त्राणि ये नराः ।
कामान्मज्जनशीलास्ते यान्ति तत्फलमञ्जसा ।
भुक्त्वा यान्ति हरेः स्थानं यावदाचन्द्रतारकम् ॥ ५॥

॥ इति ब्रह्माण्डपुराणे तुङ्गभद्रामाहात्म्ये श्रीतुङ्गभद्रास्तुतिः समाप्ता ॥

*Tungabhadra Stutih*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*